श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ सप्तविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तविंशः सर्गः ॥

## त्रिशिरसो वधः

खरं तु रामाभिमुखं प्रयान्तं वाहिनीपतिः।
राक्षसस्त्रिशिरा नाम सन्निपत्येदमब्रवीत्॥ **3.27.1** ॥

मां नियोजय विक्रान्तं त्वं निवर्तस्व साहसात्।
पश्य रामं महाबाहुं संयुगे विनिपातितम्॥ **3.27.2** ॥

प्रतिजानामि ते सत्यमायुधं चाहमालभे।
यथा रामं वधिष्यामि वधार्हं सर्वरक्षसाम्॥ **3.27.3** ॥

अहं वास्य रणे मृत्युरेष वा समरे मम।
विनिवर्त्य रणोत्साहं मुहूर्तं प्राश्निको भव॥ **3.27.4** ॥

प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि।
मयि वा निहते रामं संयुगाय प्रयास्यसि॥ **3.27.5** ॥

खरस्त्रिशिरसा तेन मृत्युलोभात् प्रसादितः।
गच्छ युध्येत्यनुज्ञातो राघवाभिमुखो ययौ॥ **3.27.6** ॥

त्रिशिरास्तु रथेनैव वाजियुक्तेन भास्वता।
अभ्यद्रवद् रणे रामं त्रिशृङ्ग इव पर्वतः॥ **3.27.7** ॥

शरधारासमूहान् स महामेघ इवोत्सृजन्।
व्यसृजत् सदृशं नादं जलार्द्रस्येव दुन्दुभेः॥ **3.27.8** ॥

आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः।
धनुषा प्रतिजग्राह विधुन्वन् सायकाञ्शितान्॥ **3.27.9** ॥

स सम्प्रहारस्तुमुलो रामत्रिशिरसोस्तदा।
सम्बभूवातिबलिनोः सिंहकुञ्जरयोरिव॥ **3.27.10** ॥

ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः।
अमर्षी कुपितो रामः संरब्ध इदमब्रवीत्॥ **3.27.11** ॥

अहो विक्रमशूरस्य राक्षसस्येदृशं बलम्।
पुष्पैरिव शरैर्योऽहं ललाटेऽस्मि परिक्षतः॥ **3.27.12** ॥

ममापि प्रतिगृह्णीष्व शरांश्चापगुणाच्च्युतान्।
एवमुक्त्वा सुसंरब्धः शरानाशीविषोपमान्॥ **3.27.13** ॥

त्रिशिरोवक्षसि क्रुद्धो निजघान चतुर्दश।
चतुर्भिस्तुरगानस्य शरैः सन्नतपर्वभिः॥ **3.27.14** ॥

न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः।
अष्टभिः सायकैः सूतं रथोपस्थे न्यपातयत्॥ **3.27.15** ॥

रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम्।
ततो हतरथात् तस्मादुत्पतन्तं निशाचरम्॥ **3.27.16** ॥

चिच्छेद रामस्तं बाणैर्हृदये सोऽभवज्जडः।
सायकैश्चाप्रमेयात्मा सामर्षस्तस्य रक्षसः॥ **3.27.17** ॥

शिरांस्यपातयत् त्रीणि वेगवद्भिस्त्रिभिः शरैः।
स धूमशोणितोद्गारी रामबाणाभिपीडितः॥ **3.27.18** ॥

न्यपतत् पतितैः पूर्वं समरस्थो निशाचरः।
हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः॥ **3.27.19** ॥

द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव।
तान् खरो द्रवतो दृष्ट्वा निवर्त्य रुषितस्त्वरन्।
राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा॥ **3.27.20** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे सप्तविंशः सर्गः॥